Sl. No. 289

# CS (MAIN) EXAM, 2010

D-DTN-K-TLB

## SANSKRIT

**Paper II**

**(Literature)**

| *Time Allowed : Three Hours* | *Maximum Marks : 300* |
|---|---|

### INSTRUCTIONS

*Candidates should attempt Question Nos. 1 and 5 which are compulsory, and any* ***three*** *of the remaining questions, selecting at least* ***one*** *question from each Section.*

*The number of marks carried by each question is indicated at the end of the question.*

*Question Nos. 4, 5 and 6 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

*Answers written in Sanskrit must be in Devanāgarī script.*

(Contd.)

## Section 'A'

**1.** अधोनिर्दिष्टान् विषयान् अधिकृत्य प्रमाण-पुरस्सरं स्वकीयान् विचारान् प्रकटयत — 20×3=60

(a) रघुवंशस्य महाकाव्यत्वम् ।

(b) द्रौपद्या कृतं युधिष्ठिरस्य उद्बोधनम् ।

(c) माघमहाकवे: शास्त्रवैदुष्यं सोदाहरणं निरूपयत ।

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भा समीक्षा समासेन कार्या — 20×3=60

(a) 'सुन्दरकाण्डम्' इति नाम्न: सार्थकता ।

(b) भगवद्गीतायां प्रतिपादितस्य कर्मयोगस्य स्वरूपम् ।

(c) अर्थशास्त्रे निर्दिष्टान् प्रजाहितोपायान् विवृणुत ।

**3.** कयोरपि **द्वयो**: विषये संक्षेपेण लिखत — 30×2=60

(a) 'वज्रादपि कठोराणि, मृदूनि कुसुमादपि' इति — भवभूतिना सूचितं रामस्य चरित्रम् ।

(b) वेणीसंहारनाटके नायक: ।

(c) मुद्राराक्षसे प्रतिफलितं चाणक्यस्य नीतिकौशलमुपपादयत ।

**4.** अधोनिर्दिष्टान् विषयान् अधिकृत्य संक्षिप्ता: सारगर्भाश्च टिप्पणी: नागराक्षरै: संस्कृतभाषया लिखत — 20×3=60

(a) पञ्चतन्त्रस्य वैशिष्ट्यम् ।

(b) गीतगोविन्दस्य सर्वाङ्गीणं सौन्दर्यम् ।

(c) हर्षचरितस्य ऐतिहासिकं प्राधान्यम् ।

## Section 'B'

5. निम्नलिखितेषु **त्रीण्येव** नागराक्षरैः संस्कृतभाषायां विस्तरेण व्याख्यायन्ताम् — 20×3=60

(a) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

(b) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥

(c) अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

(d) कृतारिषड्वर्गजयेन मानवी–
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥

6. अधोलिखितानाम् अभिप्रायं नागराक्षरैः संस्कृतभाषया विशदयत — 20×3=60

(a) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।

(b) पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ।
सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम् ॥

(c) अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥

7. अधोलिखितानाम् आशयं ससन्दर्भं स्पष्टीकुरुत — 20×3=60

(a) आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपातिप्रणयिहृदयं विप्रयोगे रुणद्धि ॥

(b) भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।

(c) अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्त्तिसाध्यमपरम्, ऐश्वर्य्यतिमिरान्धत्वम्। अशिशिरोपचारहार्य्योऽतितीव्रः दर्पदाहज्वरोष्मा। सततममूलमन्त्रशम्यः विषमो विषयविषास्वादमोहः।

8. अधोलिखितानां श्लोकानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या — 20×3=60

(a) उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥

(b) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ।

(c) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्न हार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते ॥

---